# UGC-NET

# संस्कृत

**NATIONAL TESTING AGENCY (NTA)**

**पेपर - 2 || भाग - 1**

SIERRA INNOVATIONS

# विषय सूची


## इकाई – प्रथमः

**वैदिक – साहित्य** 1

- वेदों का काल
- संहिता साहित्य
- संवाद सूक्तः
- ब्राह्मण साहित्य
- आरण्यक साहित्य
- वेदांग

## इकाई – द्वितीयः

**वैदिक साहित्य का विशिष्ट अध्ययन** 17

- सूक्तों का अध्ययन
- ब्राह्मण साहित्य
- उपनिषद् – साहित्य
- वैदिक व्याकरण, विरूक्त एवं वैदिक व्याख्या पद्धति

## इकाई – तृतीयः

**दर्शन – साहित्य** 190

## इकाई – चतुर्थः

**दर्शन – साहित्य का विशिष्ट अध्ययन** 205

- लौगाक्षिभास्कर; अर्थसंग्रह
- पतंजलि; योगसूत्र
- बादरायण; ब्रह्मसूत्र
- विश्वनाथपंचानन; न्यायसिद्धान्तमुक्तावली (अनुमानखण्ड)
- सर्वदर्शनसंग्रह; जैनमत, बौद्धमत

Toppersnotes
Unleash the topper in you

# ईकाई-प्रथमः

# वैदिक – साहित्यः

## वैदिक साहित्यस्य सामान्य परिचयम्

**वेदानां काल**:-ऋग्वेदस्य पुरुषसूक्तस्य अष्टम मन्त्रस्यानुसारेण ऋग्यजुरादीनां चतुर्णामपि वेदानाम् उत्पत्तिः सृष्टि-उत्पत्ति काले एवं सिद्ध्यति । ज्योतिषगणनानुसारेण सृष्ट्युत्पत्तिकालादारभ्य अद्यावधि पर्यन्तं 2019 सौर वर्षाणि, तदनुसारेण 1,95,58,045 वर्षाणि व्यतीतानि इति निश्चीयते । इत्थं सनातनमान्यतानुसारेण ऋषिदृष्टानां वेदानाम् अपौरुषेयत्वम् अनादित्वमेव अंगीकरणीयः, किन्तु अनुसन्धानकुशलैः पाश्चात्यैः भारतीयैश्च वेदानाम् अपौरुषेयत्वम् अनादित्वम् च नैव स्वीक्रियते । तेषां विदुषांमते अयं वेदराशिः ऋषिप्रणीतः । एतेषां वैदिकमन्त्रणां रचना कालः तु सर्वथा अनुसन्धान विषयः एव अस्ति। अतएव पाश्चात्याः भारतीयाश्च स्व-स्व विचारानुसारेण वेदकाल निर्णेतुं यतन्ते। अत्र कतिचन विदुषां विभिन्नाः सिद्धान्ताः प्रस्तूयन्ते-

**(1) मैक्समूलर** महोदयेन आदिवेदस्य ऋग्वेदस्य रचनाकाल 1000 BC-1200 BC निर्धारितः। मैक्समूलर महोदयस्य मतानुसारं गौतमबुद्धस्य कालपर्यन्तं वैदिकसाहित्यस्य रचना पूर्णा जाता। गौतमबुद्धस्य कालः 500 ई. पू. अस्ति। अनेन वैदिकसाहित्यस्य कालः चतुर्यु खण्डेषु विभक्तः। प्रत्येकखण्ड विकासाय तेन 200 वर्षस्य कालखण्डः स्वीकृतः।

(A) छन्दकालः = 200 + 1000 = 1200 ई. पू.

(B) मन्त्रकालः = 200 + 800 = 1000 ई.पू.

(C) ब्राह्मणकालः = 200 + 600 = 800 ई.पू.

(D) सूत्रकालः = 200 + 400 = 600 ई. पू.

इत्थम् ऋग्वेदस्य रचनाकालः 1200 + 2019 = 3219 वर्षेभ्यः पूर्वमेव भवितुं शक्नोति।

**(2) ए. वेबर—**वेबर महाभागस्य सम्बन्धः जर्मनदेशेने अस्ति । अस्य महोदयस्य मतमस्ति यत् वेदाः कियत् प्राचीनाः सन्ति इति निश्चितरूपेण वक्तुं नैव पार्यते । वेबरमतेन ऋग्वैदिककालः 1200 अथवा 1500 ई. पू. पश्चाद् कदापि नास्ति। तदनुसारेण इदं वक्तुं शक्यते यत् वेदाः 1500 ई.पू. इति तिथेः प्राचीनाः तु सन्ति । एव । अत्र कापि शंका नास्ति।

**(3) जैकोबी–**जर्मन विद्वान् जैकोबी महाभागानुसारेण ज्योतिषगणनाम् अधिकृत्य ऋग्वेदस्य सम्भावित-कालः 4500 ई. पू. स्वीकृतः ।

**(4) बालगंगाधर : तिलक :—** ज्योतिषाधारे वेदानां कालनिर्धारकेषु तिलकमहाभागस्य विशेष स्थानम् अस्ति । तिलकानुसारेण ऋग्वैदिककालः 6000 ई.पू.-4000 ई.पू. स्वीकृतः। तिलकमतेन वैदिकवाङ्मयस्य विकासकालः निम्नवत् स्वीकृतः-

(A) अदितिः कालः-6000 ई.पू.-4000 ई. पू. .

(B) मृगाशिरा कालः-4000 ई.पू.-2500 ई.पू.

(C) कृत्तिका कालः-2500 ई.पू.-1400 ई.पू.

(D) अन्तिम कालः-1400 ई.पू.-500 ई. पू.

ऋग्वैदिक-मन्त्राणां रचनाधिक्यं मृगाशिराकालेऽस्ति। कृत्तिकाकालस्य अन्तिमसीमा ज्योतिष्वेदांगस्य रचना अस्ति। सूत्रग्रन्थानां षड्दर्शनाना च रचनाकालः 1400 ई. पू.-500 ई.पू. अन्तिमकालः मन्यते ।

**(5) एम. विन्टरनिट्त्ज** – अनेन महाभागेन ब्राह्मणग्रन्थानां, पाणिनिव्याकरणस्य संस्कृत भाषायाः, अशोककालिकशिलालेख भाषायाः तथा वैदिक भाषायाः पारस्परिक-तुलनात्मकाध्ययनेन ऋग्वेदस्य रचनाकालः 4500 ई.पू. इति आरभ्य 6000 ई. पू. इति कालस्य मध्यवर्ती कालखण्डः स्वीकृतः। अस्य महाभागस्य मतोल्लेखः भारतीय साहित्यस्य इतिहासे उपलभ्यते।

## भारतीय-परम्परागत सिद्धान्ताः

भारतीय विदुषां मताधारे पुरातात्विकाधारे ऋग्वेदस्य कालः 4000 ई. पू. मन्यते । पाश्चात्यमतेन पुरातात्विकाधारे ऋग्वेदकालः 2000 ई. पू. अस्ति।

### कतिचिन सिद्धान्ताः सन्ति :

**(1) दयानन्द सरस्वती**—सरस्वती दयानन्देन महाभागेन मन्त्राणाम् आधारे स्पष्टीकृतः यत् वेदानां रचनाकालः सृष्टेः प्रारम्भिकं युगं भवितुं शक्यते।

**(2) दीनानाथ शास्त्री महोदयः—** शास्त्री दीनानाथ महोदयेन "वेदकालनिर्णयः" इति पुस्तके ज्योतिषाधारे इदं सिद्धम् कृतम् यत् वेदानां रचनाकाल त्रिलक्ष वर्ष पूर्वस्य अस्ति।

**(3) अविनाशचन्द्रः दासः—**अनेन महोदयेन वेदस्यरचनाकालः स्वकीये 'ऋग्वैदिक इण्डिया' इति ग्रन्थे अनेकलक्षवर्षपूर्व स्वीक्रियते। अनेन महोदयेन आर्यावर्ततश्चतुर्दिक्षु चतुःसमुद्राणां स्थितिमाधारीकृत्य भौगोलिक गणनापद्धत्या वेदस्य रचनाकालः पञ्चविशंतिसहस्रसम्वत्सर पूर्व मन्यते।

**(4) डॉ. जी. आर. भण्डारकरः—** अनेन भण्डारकरेण महाभागेन वेदानां रचनाकालः 600 ई. पू. मन्यते।

# संहिता साहित्यः

**सहितायाः सामान्यो अर्थ :-** संहितायाः शाब्दिकार्थः अस्ति सम्मिश्रणम् संकलनम् संग्रहम् वा। ऋचा समूहाः सहिताः इति कथ्यन्ते। वैदिकः वाङ्मये संहिता शब्दः क्रमबद्धमन्त्रपाठस्य अर्थे सामान्यतः प्रयुज्यते । वेदशब्दस्य निर्माण 'विद् धातुना घञ् प्रत्ययस्य करणेन भवति । यस्य अर्थः ज्ञानम् । परम् इद ज्ञानम् मानवेनोत्पन्नं नास्ति । इदं पूर्णरूपेण ईश्वरीयज्ञानम्।

वेदानां प्रसिद्ध-व्याख्याकारेण दयानन्नदसरस्वती महाभागेन वेदशब्दस्य व्युत्पत्तिः इत्थं कृतम्-विदन्ति जानन्ति, विद्यन्ते भवन्ति । सायणाचार्येण कथितः इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।

वेदाः 'श्रुति इति नाम्ना अपि आहूयन्ते। ऋग्वेदे ज्ञानस्य यजुर्वेदे कर्मस्य सामवेदे च उपासनायाः वर्णन विद्यते । अथर्ववेदे ज्ञानस्य कर्मस्य उपासनायाः च त्रयाणां विषयानां वर्णनमस्ति। इमे चत्वारः वेदाः 'वेदत्रयी इति नाम्ना अपि अभिज्ञायते । एकस्यैव वेदस्य ऋग्यजुः सामाथर्वरूपेण चत्वारो विभागाः कृताः।

## ऋग्वेद-संहिता

ऋग्वेदः विश्ववाङ्मये प्राचीनतमः वेदः। ऋग्वेदः एव ऋकसंहिताशब्देन अभिधीयते । ऋच्यते स्तूयते यया सा ऋक् इति ऋक्शब्दस्य व्युत्पत्तिः । पाश्चात्यैः पौरस्तयैश्च विद्वद्भिः ऋग्वेदसंहितायाः अन्यासंहिताभ्यः प्राचीनत्वम् उपवर्ण्यते।

ऋग्वेदे चतुःषष्ठिरध्यायाः 2006 वर्गाः सपाद 10580 मन्त्राश्च प्राप्यन्ते। ऋग्वेदगत-मन्त्रद्रष्टारो ऋषयः गृत्समद-विश्वामित्र-वामदेव- दीर्घतमाऽत्रिभरद्वाज-वशिष्ठादयः सन्ति । द्वितीय मण्डलादारभ्य-सप्तमण्डल-पर्यन्ताना मण्डलाना सम्बन्धः तस्य तस्य ऋषेः वंशेन सह सम्बद्धमस्ति।

महाभाष्यकारेण पतञ्जलिना ऋग्वेदस्य एकविंशः शाखाः मन्यते। सम्प्रति ऋग्वेदस्य प्रचलिता संहिता शाकलशाखीया एव वर्तते । अस्याः संहितायाः अन्ते ऋपरिशिष्ट नाम्ना संगृहीतानि षट्त्रिंशत्संख्यकानि सूक्तानि सन्ति । एतेषु सूक्तेषु कानिचित् सूक्तानि अतीव प्रख्यातानि सन्ति । यथा श्रीसूक्तम्, रात्रिसूक्तम्, मेधासूक्तम्, शिवसंकल्पसूक्तञ्च । वाष्कलशाखानुसारेण 'संज्ञान सूक्तम्' ऋग्वेदस्य अन्तिम सूक्तम् अस्ति । शाकलशाखानुसारेण ऋग्वेदस्य अन्तिमः मन्त्रः "समानी व आकृतिः" अस्ति । अस्मिन् शाखायां दशमण्डलानि, पञ्चाशशीत्युनवाकाः, सप्तदशोत्तर-सहस्राणि सूक्तानि, सपाद 10580 मन्त्राः सन्ति ।

निरुक्तकारेण देवताः त्रिषु भागेषु विभक्ताः

(i) धुलोकस्थानीय देवता-वरुणः— मित्रम्, उषस् सूर्यादयः।

(ii) अन्तरिक्षस्थानीयदेवताः—इन्द्रः रुद्रादयः।

(iii) पृथ्वीस्थानीयदेवताः—अग्निः, पृथ्वी, सोमादयः ।

एतत् अतिरिच्यम् विंशतिः सम्वादसूक्तानि आख्यानसूक्तानि वा प्राप्यन्ते तेषु प्रमुखाः सन्ति—

(i) यम-यमी संवादसूक्तम्—(10/10)

(ii) इन्द्र-वरुण संवाद सूक्तम्—(4/12)

(iii) देवगण-अग्निसंवादसूक्तम् (10/52)

(iv) वरुण-अग्निसंवादसूक्तम् (10/51)

(v) इन्द्र-इन्द्राणि संवाद सूक्तम् (10/86)

(vi) पुरुरवा—उर्वशी संवादसूक्तम् (10/95)

(vii) सरमा-पणि संवादसूक्तम् (10/108)

(viii) सोम-सूर्या संवादसूक्तम् (10/85)

(ix) विश्वामित्र-नदी संवादसूक्तम् (3/33)

ऋग्वेदस्य आरम्भ अग्निसूक्तेन अवसानं च संज्ञानसूक्तेन कृतम् ।

## यजुर्वेद संहिता

यजूंषि गद्यानि ! त्रेतायां यजुराख्यः एक एव वेद आसीत् । यजुर्वेदस्य प्रतिपाद्यविषयं कर्मकाण्डम् ऋत्विक् च अध्वर्युः अस्ति । मुख्यो देवः वायुः तथा 85 शाखाः सन्ति । परं 100-101 शाखानाम् उल्लेखोऽपि प्राप्यते।

यजुर्वेदे यजुषा संग्रहः अस्ति । गद्यात्मक मन्त्राणां संग्रहः । यजुस् कथ्यते। यजुर्वेदः द्वि भागेषु विभक्तः- शुक्लः कृष्णश्च । शुक्लयजुर्वेदस्य माध्यन्दिनः नामापि अस्ति ।

चतुषु वैदिक संहितासु यजुर्वेदसंहितायाः अतीव महत्त्वपूर्ण स्थानं वर्तते। अस्यां संहितायाम् एव सर्वविधानां यागादिकानां वर्णनमुपलभ्यते । शुक्लयजुर्वेदस्य द्वे शाखे विद्यते माध्यन्दिनः काण्वश्च । कृष्णयजुर्वेदस्य तैत्तिरीयशाखा, मैत्रायणीशखा, कठशाखा, कपिष्ठलशाखा च सम्प्रति समुपलभ्यते। माध्यन्दिनः (अपर नाम वाजसनेयिः) सहिता यजुर्वेदेस्य प्रतिनिधिः शाखा अस्ति । यजुर्वेदस्य वाजसनेयी संहिता चत्वारिंशदध्यायेषु विभक्ताऽस्ति। अस्याः संहितायाः चतुः त्रिशंततमो अध्यायः 'शिवसंकल्पसूक्तम्' इति नाम्ना, चतुरिंशततमो अन्तिमोऽध्यायः 'ईशावास्योपनिषद्' इति संज्ञया अभिधीयते । वाजसेनिय-यजुर्वेदस्य सम्पूर्णमन्त्रसंख्या 1975 अस्ति । तैत्तिरीय-संहितायां सप्त काण्डानि, 44 प्रपाठकाः, 631 अनुवाकाश्च सन्ति । मैत्रायणि-संहितायां चत्वारि काण्डानि, 54 प्रपाठकाः, 2114 मन्त्राश्च सन्ति।

शुक्ल यजुर्वेद शिवसंकल्पसूक्तस्य प्रजापति सूक्तस्य च अतीव महत्त्वपूर्ण स्थानमस्ति।

## सामवेद संहिता

सामवेदस्य ऋत्विकः उद्गाता देवता च सूर्यः । सामन् इत्यस्य शाब्दिकोऽर्थः 'गानम्। सामवेदीयाः मन्त्राः यदा विशेष-गान पद्धत्या गीयन्ते तदा 'साम' इति कथ्यते। सामवेदस्य मुख्य विषयं 'उपासना' इति।

अतएव सामवेदस्य प्रतिष्ठा 'गानम् एव अस्ति । सामवेदः द्विधा विभज्यते-पूर्वार्चिकम् उत्तरार्चिकम् च । पूर्वार्चिकमेव छन्दः छन्दसी, छन्दसिका चेति त्रिभिरपि नामाभिरभिधीयते । पूर्वार्चिके अग्ने इन्द्रस्य च

सम्बद्धाः मन्त्राः, उत्तरार्चिके प्रत्येकस्य मन्त्रस्य लयं तानञ्च समर्तुं वर्णनं वर्तते। विषयानुसार पूर्वार्चिक चतुषु भागेषु विभज्यते—(i) आग्नेयपर्व, (ii) ऐन्द्रपर्व, (iii) पवमानपर्व (iv) आरण्यपर्व च। उत्तरार्चिके तु अनुष्ठान-निर्देशकम् । तस्य बहवो विभागाः-यथा दशरात्रम् संवत्सरम्, ऐकाहम्, अहीनम् सत्रम्, प्रायश्चितम्, क्षुद्रञ्चेति प्रमुखस्तत्र भेदाः। अस्या सामवेद-संहितायाम् 1875 ऋचः प्राप्यन्ते । एतासु ऋक्षु केवलं 371 ऋचः ऋग्वेदसहितायां नोपलभ्यन्ते । सामवेदस्य देवः सूर्यः, ऋत्विक् च उद्गाता । सम्प्रति सामवेदसंहितायाः तिस्रः एव शाखाः समुपलभ्यन्त–(i) कौथुमीयः, (ii) राणायनीयः, (iii) जैमिनीयशाखाश्च।

सामवेदे सामविकाराः अपि प्राप्यन्ते ते षडेव सन्ति । (i) विकारः (ii) विश्लेषणम (iii) विकर्षणम् (iv) अभ्यासः (v) विरामः (vi) स्तोभः।

एतत अतिरिच्यं यज्ञ सम्पादन समये पञ्च साममन्त्राः अपि गीयन्ते

(i) प्रस्तावः (ii) उद्गीथः (iii) प्रतिहारम् (iv) उपद्रवः (v) निधनम् ।

एतत् अतिरिच्यं गानानि अपि चतुर्विधानि भवन्ति (i) ग्रामम् गेयज्ञानम् वा। (ii) अरण्यं गेयजानम् (iii) ऊहगानम् (iv) ऊध्यजानम्। ।

## अथर्ववेद संहिता

अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेद-ब्रह्मवेद अंगिरोवेद अथर्वांगिरसवेदादीनि नामानि प्रमुखतां भजन्ते। थर्व धातुः कौटिल्यार्थकः तथा हिंसावाचकः अस्ति । अतएव अथर्व शब्दस्य अर्थोऽस्ति यत् अकुटिलवृत्या अहिंसावृत्या च मनसः स्थैर्यप्राप्तकर्ता व्यक्तिः।

ब्रह्मा अथर्ववेदस्य ऋत्विगस्ति । अथर्ववेदसंहितायाः नामकरण अथर्वाऋषेः नामानुसारम् अस्ति । वेदेऽस्मिन् मारण-मोहनोच्चाटनादीनां ज्वरापस्मारादि रोग विनाशकानाञ्च मन्त्राणां संग्रहोऽस्ति । अत्र 20 काण्डानि, 34 प्रपाठकाः, 111 अनुवाकाः, 730 सूक्तानि, 5987 मन्त्राश्च सन्ति । अष्टादशतम काण्ड श्राद्धविषयक, विंशतितमश्च सोमयागवर्णनपरकम्, एतयोः काण्ड्योर्मन्त्राः ऋग्वेदीया एव।

सोमदेवः अथर्ववेदस्य देवः। सर्पवेदः पिशाचवेदः असुरवेदः इतिहासवेदः, पुराणवेदश्च अथर्ववेदस्य उपवेदाः सन्ति । अथर्ववेदस्य नवशाखा यत्र-तत्र वर्णिताः सन्ति । सम्प्रति अस्य वेदस्य द्वे एव शाखे समुपलभ्येते, पिप्पलाद-शौनकाख्ये। अथर्ववेदे प्रयुक्ताः प्रमुखाः सूक्ताः इमे सन्ति–(i) भेषजसूक्तः (ii) दीर्घायु सम्बन्धितः सूक्तः (iii) पौष्टिकसूक्तः, (iv) प्रायश्चितसूक्तः, (v) स्त्रीकर्मसूक्तः (vi) राजकर्मसूक्तः च।

# संवाद सूक्तानि

संवादसूक्तम् इति तत् सूक्तम् यत्र द्वयाधिकयोः देवयोः ऋषोः कयोः वा मध्ये वार्तालयस्य शैल्यां विषयं प्रस्तूयते । वेदेषु विभिन्नानां सूक्तानां माध्यमेन विभिन्नानां देवानां स्तुतिं विभिन्नान् विषयान् च प्रस्तुतीकृतः । तेषु कानिचित् सूक्तानि संवादसूक्तम्, इति नाम्ना अभिधीयते। प्रमुखानि संवादसूक्तानि ऋग्वेदे उपलभ्यन्ते । तेषु पुरुरवा-उर्वशी संवाद सूक्तम् (ऋक् 10/95), यम-यमी संवादसूक्तम् (ऋक्. 10/ 10), सरमा-पणि संवादसूक्तम् (ऋक् 10/108), विश्वामित्र-नदी संवादसूक्तम् (ऋक्-3/33) प्रमुखानि सन्ति।

## पुरुरवा-उर्वशी संवादसूक्तम्

पुरुरवा-उर्वशी संवादसूक्तम् ऋग्वेदेन (10/95) सम्बद्धम् । अष्टादशः मन्त्रे समन्वितं इदम् सूक्तम् ऋग्वेदस्य दशममण्डलस्य 95 तमम् सूक्तम् । अस्मिन् सूक्ते पुरुरवा-उर्वश्योः प्रणयकथा वर्णिताऽस्ति । पुरुरवा-उर्वशी-संवादसूक्तस्य

पुरुरवा ऐल ऋषिः सूक्ते उर्वशी ऋषिका। पुरुरवा ऐल, उर्वशी च देवतारूपे ज्ञातः । अस्मिन् सूक्ते त्रिष्टुप् छन्दः प्रयुक्तः। अस्मिन् छन्दसि एकादशाक्षराणं चत्वार पादाः भवन्ति । हृदयवशी भूतकी उर्वशी अप्सरारूपे मान्या । स्कन्दाचार्य-मतानुसार उर्वशीशब्दस्याभिप्राय विद्युत् अस्ति । ब्रह्मोत्पन्न-मूलसक्रिय 'अपि' तत्त्वेन या उत्पन्ना सा उर्वशी अस्ति । पुरुरवायाः व्युत्पत्तिपरकार्थः विपलशब्दागारः, विपुलज्ञानी, निर्देश समर्थश्चास्ति । निरुक्तानुसार प्राण एव हि पुरुरवा।

सफलतथ्याधारे इदं स्पष्टं भवति यत् पुरुरवा इति सूर्यः उर्वशी च प्रातःकालीन उषस् अस्ति । सूर्योदये उषसः लुप्तीकरणं भवति ।

## यम-यमी संवादसूक्तम्

यम-यमी संवादसूक्तम् ऋग्वेदेन (10/10) सम्बद्धम् । चतुर्दश-मन्त्रैः युक्तं इदम् सूक्तम् ऋग्वेदस्य दशमण्डलस्य दशतमम् सूक्तम् अस्ति । अस्मिन् सूक्ते यम (भ्राता) यमी भगिन्योः कथोपकथनम् अस्ति । यमी स्वभ्रातरं यमं सहवसितु कथयति परं यमः विरोध करोति । कथयति च यत् अहं त्वया सह सहवासं कर्तुं न शक्नोमि यतः त्वं मम भगिनी असि । देवानांच चराः सर्वत्र विराजमानाः सन्ति ते उचितानुचित जानन्ति । यमस्य कथनं श्रुत्वा यमी क्रुद्धो भूत्वा उवाच-एतेन भ्रात्रा को लाभः एतेन माम् भगिनी कोऽपि लाभः । अन्ते यमः यम्या सह सम्बन्ध स्थापित न करोति।

अस्य सूक्तस्य 'यम वैवस्वत्' ऋषिः, यमी वैवस्वती च ऋषिकास्ति। यम वैवस्वत्/यमी वैवस्वती देवतारूपे ज्ञातः। यम-यमी पितुर्नाम् विवस्वान् अस्ति । 'तेजस् सम्पन्न' इति विवस्वान् पदस्य अर्थः।

## सरमा-पाणि संवादसूक्तम्

सरमा-पणि-सम्वादसूक्तम् अपि ऋग्वेदेन (10/108) सम्बद्धम् । एकादश मन्त्रैः सूक्तम् इदम् सूक्तम् ऋग्वेदस्य दशममण्डलस्य 108 तमम् सूक्तम् । अस्मिन् । सूक्ते पणयः इन्द्रस्य गाः अपहन्ति । सरमा नामा कुक्कुरी सन्देशवाहिका इन्द्रस्य । गवा ज्ञातु इन्द्रादेशेन गच्छति । पणिभिः पर्वतेषु इन्द्रस्य गावः निक्षिप्ताः । सा

पणीन् कथयति, पणयः। अहं इन्द्रस्य दूती भूत्वा अत्र आगतास्मि । भवन्तः इन्द्रस्य गाः । प्रत्यर्पयन्तु । इन्द्रस्य दूतीरिषिता चरामि, महइच्छन्ती पणयो निधीन्वः।

पणयः अकथयन्-इन्द्रस्य वर्ण-वेषम्कीदृशम् । तस्य दृष्टिः कीदृशी । वयं तं । मित्रं निर्मातु इच्छामः।

अस्य सूक्तस्य पणि-असुर समूहः ऋषिः, सरमा देवशुनी ऋषिका च । अत्र सरमा, पणि देवतारूपे ज्ञातः ।

सरमा-पणि संवादसूक्ते इन्द्रदेवधेन्वपहरणवृतान्तः। अत्र इन्द्रदेवधेन्वपहरणकर्ता पणिः। अस्याः धेन्वहरणघटनायाः बृहस्पतिः प्रत्यक्षदर्शी । इन्द्रस्य दूती सरमा।

## विश्वामित्र-नदी संवादसूक्तम् (ऋग्वेद 3/33)

इद्म सूक्तमपि ऋग्वेदेन सम्बद्धम् । त्रयोदश-मन्त्रै समन्वितं इदं सूक्तम् ऋग्वेदस्य तृतीयमण्डलस्य त्रयत्रिंशत्तमं सूक्तम् ।

अत्र त्रयोदशमन्त्रेषु नदीः प्रार्थना कृता यत् अस्मान् निर्गन्तुं मार्ग दत्त । अन्ते वार्तालापे पूर्णं जाते नद्यः विश्वामित्राय तथैव मार्ग ददति यथैव माता स्वपुत्राय स्वदुग्धं ददाति । अस्य सूक्तस्य विश्वामित्र-गाथिन ऋषिः, विपाट् (व्यासः) शुतद्रि (सतलजः) नामनी नद्यौ ऋषिका च । सूक्तस्यदेवता नद्यौ (व्यासः सतलजः च) सूक्तस्य छन्दः त्रिष्टुप् अनुष्टुप् च।

## ब्राह्मणसाहित्यः संक्षिप्त परिचयम्

संक्षिप्तं परिचयम् - ब्राह्मणसाहित्यम् अतीव व्यापकं विशालञ्चास्ति। यद्यपि साम्प्रतं ब्राह्मणसाहित्यस्य महान् भागो नहि समुपलभ्यते। तेषां कतिपयानि उदाहरणानि एवं कतिपयेषु श्रौतग्रन्थेषु समुपलभ्यन्ते।

ग्रन्थवाचकस्य ब्राह्मणशब्दस्य प्रयोगः नपुंसकलिंगे एव उपलभ्यते - ब्राह्मण ब्रह्मसंघाते वेदभागे नपुसकम्। येषां ग्रन्थानां संयोगः ब्रह्मणा एव भवति, ते ब्राह्मण-ग्रन्थाः कथ्यन्ते-ब्राह्मणोऽयमिति ब्राह्मणः । वेदमन्त्रै सम्बन्धत्वात् ब्राह्मणग्रन्था कथ्यन्ते-'ब्रह्म वै मन्त्र'।

ब्रह्माशब्दस्य एकोऽर्थः 'यज्ञः' अपि अस्ति। यज्ञसम्बन्धि-क्रियान् करणेन अपि ब्राह्मणः कथ्यते। भट्टभास्करेण कर्मकाण्डानुसार मन्त्राणाम् व्याख्यानुसार च एते ब्राह्मणाः मताः--ब्राह्मण नाम कर्मणस्तन्मन्त्राणा व्याख्यान ग्रन्थः ।

शबरस्वामिना ब्राह्मणग्रन्थेषु प्रतिपादितानां साधनाना संख्या दशः मता-

**हेतु निर्वचनं निन्दा प्रशंसा संशयो विधिः।**
**परक्रिया पुराकल्पो व्यवधारण-कल्पना।।**
**उपमानं दशैते तु विधियो ब्राह्मणस्य तु। (शबरभाष्य-2/1/8)**

एतेषु साधनेषु प्रमुखता विधेः एव अस्ति । विधेः अन्तर्गत विविधान् नियमान् विधानीकृतः।

## वेदक्रमानुसारं ब्राह्मणग्रन्थानां संक्षिप्त परिचयम्

**(क) ऋग्वेदीयाः ब्राह्मणग्रन्थाः-** ऋग्वेदस्य द्वे ब्राह्मणे स्तः, ऐतरेयब्राह्मण शांखायन ब्राह्मणञ्च । ऐतरेयब्राह्मणस्य लेखकः महीदासः मन्यते । ऐतरेयब्राह्मणम् 40 अध्यायेषु विभक्तम् । ऐतरेयब्राह्मणम् अतीव प्रथितमस्ति । ब्राह्मणेऽस्मिन् अष्टौ पंचिकाः सन्ति तासु पञ्चिकासु पञ्च-पञ्च अध्यायाः सन्ति । इत्थमत्र पंचारिंशदा-ध्यायाः सन्ति।

शांखायनं कौषीतकि ब्राह्मणम् वा 30 अध्यायेंषु विभक्तम् । अस्मिन् ग्रन्थे अग्न्याधानम्, अग्निहोत्रम् दर्शपौर्णमासस्य चातुर्मास्य च इष्टीनां वर्णनम् अस्ति ।

**(ख) यजुर्वेदीयाः ब्राह्मणग्रन्थाः-** यजुर्वेदस्य द्वे ब्राह्मणे स्त । शुक्लयजुर्वेदस्य शतपथ-ब्राह्मणमतीव विशालं ख्यातिलब्धं चास्ति। अत्र शतमध्यायाः वर्तन्ते । शतमध्याये सति अस्य नाम 'शतपथम्' इति प्रथितम् अस्ति। कृष्णयजुर्वेदस्य तैत्तिरीय ब्राह्मण नामा ब्राह्मणभागः समुपलभ्यते। तत् त्रिषु काण्डेषु विभक्तम्। प्रथमे काण्डे अग्न्याधानम्, वाजपेय-सोम-राजसूयादीनां वर्णनम् अस्ति, द्वितीये काण्डे सौत्रायणिः वैश्यसवादीनां तृतीये काण्डे च 'नक्षत्रेष्टि' इति प्रधानरूपेण वर्णितम्। यद्यपि प्रथमद्वितीयकाण्डयोः अष्टौ-अष्टौ अध्याया सन्ति किन्तु तृतीये काण्डे द्वादशाध्यायाः वर्तन्ते।

**(ग) सामवेदीयाः ब्राह्मणग्रन्थाः**-सामवेदस्य नव ब्राह्मणग्रन्थाः उपलभ्यन्ते-

(1) पञ्चविंशदध्यात्मकं ब्राह्मणम्, अस्मिन् 25 अध्यायाः सन्ति यत् 'महाब्राह्मणम्' इति नाम्ना अपि ज्ञायते। महाब्राह्मणसंज्ञा तु अस्य महाकायत्वात् प्रसिद्धाऽस्ति। ताण्डयेति अभिधानमस्य सामवेदस्य तण्डिशाखां द्योतयति। ब्राह्मणेस्मिन् समस्तकार्याणां सविस्तरं वर्णनम् उपलभ्यते।

(2) षड्विंशब्राह्मणम् अस्मिन पञ्च प्रपाठकाः सन्ति।

(3) छान्दोग्यब्राह्मणम् अस्मिन् द्वौ प्रपाठकौ स्तः यौ अष्टखण्डेषु विभक्ताः सन्ति।

(4) सामविधानब्राह्मणम् अस्मिन् ब्राह्मणे कृच्छ्राति कृच्छ्रादीनां व्रताना, पुत्र-ऐश्वर्याणां प्राप्त्यर्थं बहुविधानां अनुष्ठानानां वर्णनम् अस्ति। सामवेदस्य उपलब्धेषु ब्राह्मणग्रन्थेषु विषयदृष्ट्या सामविधानब्राह्मणाम् नितरा भिन्नमस्ति। ब्राह्मणेऽस्मिन् शत्रूणां विनाशाय, अभिचाराय, नानाविधोपद्रवंशमनाय, धनार्जनाय, लौकिकालौकिक-सुख विकासाय च सामगानेन समं विशिष्टामनुष्ठानाना विधानमस्ति।

(5) आर्षेय ब्राह्मणम्-अस्मिन् ब्राह्मणे त्रयः प्रपाठकाः सन्ति।

(6) दैवत ब्राह्मणम् इदं त्रिषु खण्डेषु विभक्तम् ।

(7) संहितापनिषद्ब्राह्मणम् अस्मिन् सामगान-पद्धतेः वर्णनम् कृतम् ।

(8) वंश ब्राह्मणम्-सामवेदस्य गुरूणां वंशपरम्पराया वर्णनम् अस्मिन्नेव प्राप्यते।

(9) जैमिनीय ब्राह्मणम्-इदं तवलकार ब्राह्मण-नाम्ना अपि ज्ञायते। अस्मिन् जैमिनीय ब्राह्मणे यागानुष्ठानानां वर्णनंकृतम्।

(घ) **अथर्ववेदीयः ब्राह्मणग्रन्थः**- अथर्ववेदस्य केवल गोपथब्राह्मणमस्ति। गोपथब्राह्मणम् खण्ड द्वयात्मकमस्ति- (i) पूर्वगोपथब्राह्मणम्, (ii) उत्तर गोपथ ब्राह्मणम् । प्रथमे खण्डे पूर्व गोपथ ब्राह्मणे पञ्चाध्याया तथा द्वितीये खण्डे उत्तरगोपथ बाह्मणे षड्ध्याया सन्ति । अस्य ऋषिः गोपथ मन्यते।

**ब्राह्मणग्रन्थानां वैशिष्ट्यम्**—ब्राह्मणग्रन्थानां मुख्यवैशिष्ट्यम् तु यज्ञ सम्पादनमेव । यज्ञस्य सूक्ष्मातिसूक्ष्मविधानमपि ब्राह्मणग्रन्थेषु विस्तरेण समुपलभ्यते। ब्राह्मणग्रन्थेषु यज्ञस्य इयान् महिमा एतादृशश्च आदरो वर्तते यद् विश्वस्य कर्ता प्रजापतिरपि यज्ञस्वरूप एवास्ति । यथोक्तम् शतपथब्राह्मणे-"यज्ञो वै श्रेष्ठतम कर्म । यज्ञो वै विष्णुः' "स च यज्ञोऽसौ आदित्यः" इति।

# आरण्यक-साहित्यः

**अरण्याध्ययनादेतद् आरण्यक मितीर्यते।**

**अरण्ये तदधीयेतेत्येवं वाक्यं प्रचक्षते।।**

सायणाचार्यस्य उपर्युक्त कथनानुसारेण अरण्ये पाठ्यत्वेन अस्य ग्रन्थस्य आरण्यकम् इति सार्थकमभिधान वर्तते । यतः मन्त्राणा मननस्य हृदयंगमस्य वा सर्वश्रेष्ठ स्थानमरण्यमेव भवति।

## 'आरण्यकः' इतिपदस्य व्युत्पत्तिपरकम् अर्थम्

'आरण्यक शब्दः अरण्ये भवः' इत्यर्थे ' अरण्य'-शब्दात् अण्-प्रत्ययकरणेन पुनः अकच्-प्रत्ययस्य योगात् 'आरण्यक'-शब्दो निष्पद्यते। आरण्यक इत्यस्य पृष्ठभूमौ आशयोऽस्ति 'अरण्ये आरण्यकाना वनवासिना पठनीयता'। ये गन्थाः वने विरचिताः, तथा अरण्यभागस्य गुरुकुलेषु येषां पठन-पाठनमपि विकसितमभूत्, ते एव ग्रन्था अद्य आरण्यक संज्ञयाऽभिधीयन्ते । सायणाचार्येण तैत्तिरीयस्य ऐतरेस्य च आरण्यकाना भाष्ये 'आरण्यकस्य एवमर्थः कृतः येऽरण्ये पठ्यन्ते वा पाठ्यन्ते ते आरण्यका उच्यन्ते अरण्याध्ययनात् एतत् आरण्यकमितीर्यते ।' अर्थात् येषामाध्यत्मिकग्रन्थाना मननं चिन्तनं ग्रामस्य नगरस्य च कोलाहलहपूर्ण वातावरणे असम्भवत्वात् अरण्यस्य एकान्तशान्तवातावरणेऽभवत्, वेदसन्निहितानां नैकानां रहस्यानमुद्घाटनं यत्र कृतमासीत् तथा येषां माध्यमेन प्राणविद्याया दार्शनिक विश्लेषणं कृतमासीत् तान्येय (अथवा ते ग्रन्थाः) आरण्यक नाम्ना ज्ञायन्ते ।

**तिपाद्यविषय** :-प्राणविद्या प्रधान मन्त्रब्राह्मणात्मकः वेदांश एवं आरण्यकमिति संज्ञा लभते। अर्थात् आरण्यकग्रन्थाना मुख्य प्रतिपाद्य-विषयः प्राणविद्या एवास्ति। अस्या दिशायां प्राणविद्या प्रतीकोपासना च आरण्यग्रन्थाना महनीया विशेषता अस्ति। दार्शनिक-विचाराणा तथ्याना वाऽपि व्याख्या आरण्यकग्रन्थेषु यत्र-तत्र समुपलभ्यते । आरण्यक-ग्रन्थानां महत्त्व प्रतिपादयता महर्षिणा कृष्णद्वैपायनेन लिखितमस्ति आरण्यकञ्च वेदेभ्यः औषधिभ्योऽमृत यथा अर्थात् येन प्रकारेण औषधिभ्योऽमृत गृहीत तेनैव प्रकारेण वेदेभ्य आरण्यकग्रन्थाः संगृहीताः सन्ति । सामान्यतः आरण्यकाना संख्या 1130 मन्यते परं सम्प्रति केवल सप्त आरण्यकग्रन्था एव उपलभ्यन्ते ।

**(क) ऋग्वेदीया : आरण्यकग्रन्थाः**—ऋग्वेदे केवल द्वे एवं आरण्यके उपलब्धौ। (1) ऐतरेयारण्यकः, (2) शांखायनारण्यकश्च । ऐतरेयाण्यके 17 अध्यायाः सन्ति इमे अध्यायाः पञ्चभागेषु विभक्ताः । एतेषु महाव्रतम्, प्राणविद्यायाः पुरुषस्य च विवेचनमस्ति । शांखायनारण्यकम् 15 अध्यायेषु समन्वितम् अस्ति। अस्य आरण्यकस्य प्रथम द्वितीयाध्याययोः महाव्रतस्य वर्णनं विद्यते। ग्रन्थस्यास्य अन्तिमे पंचदशेऽध्याये आचार्यवरस्य शांखायनस्य वंशपरम्परायाः वर्णनमस्ति। ग्रन्थोऽयम ऋग्वेदस्य शांखायनशाखायाः अनुगामी अस्ति।

**(ख) यजुर्वेदीया : आरण्यकग्रन्था**:-अत्र त्रयः आरण्यक ग्रन्था.. उपलभ्यन्ते-

(i) वृहदारण्यकः शुक्लयजुर्वेदस्य कृष्ण यजुर्वेदस्य शाखयोः प्राप्नोति । अस्मिन् यज्ञाना रहस्यं वर्ण्यते।

(ii) तैत्तिरीयारण्यकः इदं कृष्णयजुर्वेदस्य तैत्तिरीय शाखायाम् आधारितमस्ति। अस्मिन् 10 प्रपाठकानि सन्ति। अस्मिन् अग्नेः उपासना, इष्टस्य चयन, पञ्चमहायज्ञानां वर्णनमपि वर्तते। अस्य आरण्यकग्रन्थस्य दशम प्रपाठक, महानारयणीयोपनिषद् इति अभिधानेन अभिधीयते।

(iii) मैत्रायणी आरण्यकः—अस्मिन् आरण्यकोपनिषदयोः मिश्रणमस्ति । कृष्ण यजुर्वेदीय शाखायामुपलब्धे अस्मिन् सप्त प्रपाठकानि सन्ति।

**(ग) सामवेदीयाः आरण्यकग्रन्थाः**- सामवेदस्य जैमिनीयशाखायाः जैमिनीयोपनिषद् ब्राह्मणमेव तवलकाराण्यकमिति नाम्नाऽभिधीयते।

**(घ)** कोऽपि अथर्ववेदीयारण्यकम् उपलब्धम् नास्ति।

## वेदाङ्गानि-शिक्षा, कल्पं, व्याकरणं, निरुक्तं, छन्दस, ज्योतिष् च

### वेदाङ्गं सामान्यस्वरूपम्

'अङ्ग्यन्ते ज्ञायन्ते एभिः इति अङ्गानि' अर्थात् यैः कस्यचिद् वस्तुनः स्वरूपज्ञाने साहाय्यं प्राप्यते तानि तद्वस्तुनः अङ्गानि कथयन्ति। वेदानां वास्तविकमर्थमवबोधयितु यानि साधनानि उपयोगीनि आसन् तानि वेदाङ्गाः कथ्यन्ते स्म । वेदानां सम्यग् अवबोधार्थम् एवं तद्रूपकार्यकलापस्य सञ्चालनार्थं वेदाङ्गाः प्रवृत्ताः ।

एतद्वेदाङ्गाना समुत्पत्तिः सम्भवतः उपनिषत्काले सजाता भविष्यति। प्रारम्भे वेदाङ्गानि स्वतन्त्रविषयरूपेण न भवन्ति वेदाध्ययनार्थं विशिष्टानि उपयोगीनि च प्रकाराण्यासन्। अनन्तरमेतानि स्वतन्त्रविषयरूपेण विकसितान्यभवन्। सर्वप्रथम मुण्डकोपनिषदि आथर्वणिकैः वेदाङ्गानि अपराविद्याऽन्तर्गतानि चतुर्वेदानां नामोल्लेखस्य पश्चाद् निरूपितानि ।

**वेदाङ्गानां संख्या** - वेदाङ्गानि षड् मन्यन्ते – 1. शिक्षा, 2. व्याकरणम्, 3. छन्दः, 4. निरुक्तम्, 5. ज्योतिषम्, 6. कल्पः।

**शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।**
**कल्पश्चेति षडङ्गानि वेदस्याहर्मनीषिणः।।**

वेदाङ्ग क्रमसम्बन्धे विद्वांसः एकमताः नैव सन्ति । परन्तु पाणिनीय शिक्षायाम एकस्य वेदपुरुषस्य कल्पना कृतास्ति । तस्य विभिन्न शारीरिक अवयवरूपेण षड्वेदाङ्गानामुल्लेखोऽस्ति । तदनुसारं छन्दांसि वेदपुरुषस्य पादाः, कल्पः हस्ताः ज्योतिष नेत्राणि, निरुक्त श्रोत्राणि, शिक्षा नासिका एवं व्याकरण मुखं स्मृतम्।

## वेदाङ्गानाम् सामान्यः परिचयः

वेदाङ्गानामुद्भवस्य एवं तद् उपयोगस्य विषये सक्षेपरूपेण वक्तु शक्यते यत्--

1. शिक्षाया वेदमन्त्राणां यथेष्टोच्चारणस्य विवेचनास्ति,
2. कल्पे वैदिक कर्मकाण्डस्य यज्ञानुष्ठानस्य च विशदं वर्णनमस्ति,
3. व्याकरणस्य उपयोगः शब्दरूपेण ज्ञानार्थं क्रियते,
4. अर्थज्ञानाय शब्दाना निर्वचननिमित्तेन निरुक्तं तद्व्युत्पत्तिमुद्घाटयति ।
5. छन्दसा विषयः वैदिकछन्दसा मीमांसास्ति,
6. ज्योतिष यज्ञानुष्ठानाय समुचित कालनिर्णयस्य निर्देश ददाति।

## शिक्षा-वेदाङ्गस्य स्वरूपं

"शिक्षा धाणन्तु वेदस्य अर्थात् शिक्षा वेदपुरुषस्य नासिकाऽस्ति । शिक्षाया आशयोऽस्ति-वर्णोच्चारणशिक्षा प्रदानम् । सायणाचार्यः ऋग्वेदादिभाष्य-भूमिकाम्, उल्लेखितवान् यद् यया वैदिकमन्त्राणां शुद्धातिशुद्ध-उच्चारणस्य बोधो भवति सा शिक्षा अभिधीयते-"स्वरवर्णाधुच्चारण प्रकारो यत्र शिक्ष्यते सा शिक्षा" अर्थात् शिक्षाया उद्देश्यम् अस्ति-वर्णोच्चारणशिक्षा प्रदानम्, कस्य वर्णस्य कस्मात्, स्थानात प्रयत्नाच्च उच्चारण भवितव्यम्, स्वरयोजनं कथं क्रियते इत्यादि विषयाणां ज्ञानप्रदानम् । उदात्त--अनुदात्त त्वरित स्वराणाम् असमीचीनोच्चारणेन भयङ्करोऽनर्थः भवितु शक्यः।

वैदिकसाहित्ये स्वरप्रक्रियाः अत्यन्त महत्त्वपूर्ण स्थान विद्यते । अस्य कारणम् अर्थनियामकत्वमस्ति।

उपनिषत्काले शिक्षासिद्धान्तस्य निदर्शनमभूत्, तद्नुसार तैत्तिरीयोपनिषदि शिक्षायाः षड्ङ्गानामुल्लेखोऽस्ति वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः ।

**वर्ण स्वरः, मात्रा बलम्, साम सन्तानः इत्युक्तः शिक्षाध्यायः (तैत्तिरीयोपनिषद् 1-2)**
शिक्षावेदाङ्गम् एकप्रकारेण आधुनिकध्वनि-विज्ञान समानमस्ति।

## कल्पनामकस्य वेदाङ्गस्य सामान्यस्वरूपम्

कल्पशास्त्र वेदपुरुषस्य हस्तरूपेण स्वीकृतमस्ति। कल्पस्य अर्थः यागविधीनां समर्थनप्रतिपादनञ्च"कल्प्यते समर्थ्यतेऽत्र यागप्रयोगः।' कल्पस्य द्वितीया

व्याख्यास्ति-यत्र वेदिकर्मणां व्यवस्थितरूपेण वर्णनम् अथवा प्रतिपादनं भवति, तच्छास्त्रं कल्प उच्यते। वस्तुतः वैदिककर्मकाण्डस्य विस्तारः कल्पसूत्ररूपेण सूत्रबद्धः कृतोऽस्ति। एषः चतुर्षु भागेषु विभक्तोऽस्ति–(i) श्रौतसूत्रम्, (ii) गृह्यसूत्रम्, (iii) धर्मसूत्रम्. (iv) शुल्वसूत्रम्।

## चतुर्विधानि सूत्राणि

(i) **श्रौतसूत्रम् -** एतेषु महत्वपूर्णयज्ञानां क्रमबद्धं वर्णनं प्राप्यते। एतेषु यज्ञेषु प्रमुखाः सन्ति-दर्शपौर्णमासः सोमयागः,वाजपेयः,राजसूयः,अश्वमेधः,पुरुषमेधःप्रभृतयः। एतदरिक्ति दक्षिण आवाहनीय गार्हपत्यअग्नीनाम् इष्टीनां वर्णनमास्ते। वेदस्य पृथक्-पृथक् श्रौतसूत्राणि सन्ति ।

(ii) **गृह्यसूत्रम्**-एते ते सन्ति येषु गृह्याग्नि साध्य यज्ञानाम्, विवाहादिसंस्काराणाम्, शालानिर्माणस्य च तथा कृषिकर्मणां विधानमस्ति। एतेषु प्रायः षोडशसंस्काराणाम्, पञ्च ज्ञानाम्, पाकयज्ञानाम्, गृहनिर्माणगृहप्रवेशपशुपालन-रोगनाशक विधीनां विवरणमस्ति।

(iii) **धर्मसूत्रम्**-धर्मसूत्रेषु नीति-धर्म-रीति-प्रधानाम्, चतुवर्ण आश्रम कर्तव्यानाम् एवं सामाजिक नियमानां वर्णनमुपलब्धमस्ति।

(iv) **शुल्वसूत्रम्**-शुल्वस्यार्थः भवति 'रज्जु' अर्थात् रज्जु द्वारा मापित-वेदि-रचनाविधानं शुल्वसूत्रस्य प्रतिपाद्यो विषयो विद्यते। प्राचीना भारतीया ज्यामितिः कियती विकसिता आसीत् एतद्ज्ञानं शुल्वसूत्रेणोपलभ्यते।

### वेदक्रमेण उपलब्धकल्पसूत्राणि तालिका

| वेदस्य नाम | श्रौतसूत्रम् | गृह्यसूत्रम् | धर्मसूत्रम् | शुल्वसूत्रम् |
|---|---|---|---|---|
| ऋग्वेदः | आश्वलायनम् शांखायनम् च | आश्वलायन, शाखायनम्, कौषीतकि-गृह्यसूत्रम् | वसिष्ठ-विष्णु-धर्मसूत्राणि | - |
| शुक्ल यजुर्वेदः | कात्यायनम् | पारस्कर-गृह्यसूत्रम् | हारीत-शंख-धर्मसूत्राणि | कात्यायनीयम् |
| कृष्ण यजुर्वेदः | बौधायन-आपस्तम्ब-हिरण्यकेशी बैधानस भारद्वाज मानव-वाराह-श्रौतसूत्राणि | बौधायन-आपस्तम्ब-हिरण्यकेशी-भारद्वाज-मानव-काठक- गृह्यसूत्राणि | बौधायन-आपस्तम्ब-हिरण्यकेशी-धर्मसूत्राणि | बौधायन-आपस्तम्ब- मानव शुल्वसूत्राणि |

| | | | | |
|---|---|---|---|---|
| सामवेदः | आर्षेय-(मशक) लाट्यायन- बाह्यायण जैमिनीय श्रौत सूत्रम् | ब्राह्मण-गोभिल-खादिर-जैमिनीय गृह्यसूत्रम् | गौतम धर्मसूत्रम् | |
| अथर्ववेदः | वैतान श्रौतसूत्रम् | कौशिक गृह्यसूत्रम् | - | - |

## व्याकरणवेदाङ्गम्

एतद् वेदपुरुषस्य मुखमुक्तमस्ति—'मुखं व्याकरणं स्मृतम्'। व्याकरणं पद-पदार्थयोः, वाक्य-वाक्यार्थयोः अभिव्यक्तेः प्रकृति-प्रत्यय-विश्लेषणस्य च साधनमास्ते । व्याकरणस्य रूपकं वृषभेण बद्धमस्ति यतोहि एतत्कामसम्पूर्ति-कारक शास्त्रमस्ति । अस्य व्याकरण-वृषभस्य चत्वारः शृंगाः सन्ति । नाम-आख्यात-उपसर्ग निपाताः। भूत-वर्तमान भविष्याणि इमानि अस्य पादपभूतानि सन्ति । सुप-तिङ् (प्रत्यया) द्वे शिरसी स्तः, सप्त विभक्तय-श्च सप्त हस्ताः । एषः उरु-कण्ठ-शिरः एतत् त्रिषुस्थानेषु बद्धः अस्ति।

## छन्दोवेदाङ्गस्य स्वरूपं

वैदिकमंत्राणां विशुद्धोच्चारणस्य हेतोः छन्दसा ज्ञानं नितान्तम् अनिवार्यमस्ति। । छन्दोज्ञानमन्तरेण मन्त्रः निष्फलो भवति । छन्दः वेदस्य पञ्चमः अङ्गः । प्रमुखछन्दसा नामोल्लेखस्तु संहितासु तथा ब्राह्मण ग्रन्थेष्वेव सम्प्राप्यते । अतः सिद्धयति पदस्य उत्पत्तिः वैदिकयुगे एव अभवत्।

यास्केन निरुक्ते (7-19) छन्दस शब्दस्य निर्वचनं छद-धातोः- कृतमस्तिः- छन्दांसि छादनात् अर्थात् छन्दांसि भावान् आच्छाद्य समष्टि रूप प्रयच्छन्ति।

कात्यायनेन सर्वानुक्रमण्यां छन्दसः लक्षणं दत्तमस्ति—'यदक्षरपरिमाणं तच्छन्दः' यद् अक्षरस्य परिमाणम् तत् छन्दः कथ्यते।

अस्य वेदाङ्गस्य प्रतिनिधि ग्रन्थः पिंगलाचार्यप्रणीतं छन्दः-सूत्रमस्ति यस्य प्रथम चतुर्षु अध्यायेषु वैदिक छन्दसां वर्णनमस्ति। वैदिकछन्दांसि केवलम् अक्षरगणनामाधृतानि सन्ति । एतेषु सामान्यनियमस्याभाव अस्ति।

## वैदिक छन्दसां भेदाः

मुख्यानि वैदिक छन्दांसि केवलं सप्त सन्ति, येषां नामानि अक्षरसंख्या च इत्थं वर्तन्तेः

1. गायत्री 24 अक्षराणि
2. उष्णिक 28 अक्षराणि
3. अनुष्टुप् 32 अक्षराणि
4. बृहती 36 अक्षराणि
5. पंक्ति 40 अक्षराणि
6. त्रिष्टुप् 44 अक्षराणि
7. जगती 48 अक्षराणि

एतदतिरिक्तम् अतिच्छन्दः विच्छन्दः अपि भवतः । अतिच्छन्दसः विवरणमेवावं विद्यते:

| | |
|---|---|
| 1. अतिजगती | 52 अक्षराणि |
| 2.शक्वरी | 56 अक्षराणि |
| 3. अतिशक्वरी | 60 अक्षराणि |
| 4. अष्टि. | 64 अक्षराणि |
| 5. अत्यष्टिः | 68 अक्षराणि |
| 6. धृति. | 72 अक्षराणि |
| 7. अतिधृतिः | 76 अक्षराणि |

**विच्छन्दसः विवरमित्थं वर्तते**

| | |
|---|---|
| 1. कृतिः | 80 अक्षराणि |
| 2. प्रकृतिः | 84 अक्षराणि |
| 3. आकृति | 88 अक्षराणि |
| 4. विकृति | 92 अक्षराणि |
| 5. संकृति | 96 अक्षराणि |
| 6. अतिकृति | 100 अक्षराणि |
| 7. उत्कृति | 104 अक्षराणि |

अक्षरगणनाप्रधान वैदिक छन्दोभ्य एव लौकिक छन्दसां प्रादुर्भाव: सञ्जातोऽस्ति । लौकिक छन्द सु चत्वारि चरणानि भवन्ति, परन्तु वैदिकच्छन्द समीमीदृग विधानं नास्ति । वेदेषु तु पादद्वयवद्भ्य छन्दोभ्य प्रारम्भ पञ्चपादोपतानि छन्दांसि अपि प्राप्यन्ते।

## ज्योतिर्वेदाङ्गस्य सामान्य परिचयः

वैदिकयज्ञानां सम्पादनार्थं शुभमुहूर्तनिर्धारण-हेतवे वेदाङ्गज्योतिषस्य आवश्यकत्व मन्यते। वेदाङ्गज्योतिष (ज्योतिषि, ज्योतिष, इत्यादि शुद्धम) अस्य महत्व भाषितमस्ति यदि शास्त्र यज्ञाना कालविधाननिदर्शकमस्ति।

वेदाङ्गज्योतिष द्वयोः भागयोः प्राप्यते यस्य सम्बन्धः ऋग्वेदेन यजुर्वेदन चास्ति। ऋग्वेद ज्योतिषे 36 श्लोकाः (पद्यानि) सन्ति । अस्य एकमन्यन्नाम आर्चज्योतिषमपि प्राप्त भवति । अस्य कर्ता आचार्य लगधः मन्यते । द्वितीयभागस्य-यजुर्वेद-ज्योतिष चतुश्चत्वारिंशत् (44) श्लोकाः सन्ति ।
ज्योतिष शास्त्र वेदपुरुषस्य नेत्रमभिधीयते । वेदानुसार विहितयज्ञाना विधान विशिष्टसमयमपेक्षते। अतः नक्षत्र-विधि वार-मास-संवत्सर इत्यादीना ज्ञान वैदिककर्मकाण्डहेतवे आवश्यक वर्तते । यतः यथार्थ ज्योतिर्विदेव यज्ञस्य यथार्थ ज्ञातास्ति।

## निरुक्तवेदाङ्गस्य सामान्य परिचयः

व्याकरणेन भाषाविज्ञानेन च निरुक्तस्य विशिष्टः सम्बन्धोऽस्ति। वेदमन्त्राणामर्थावबोधाय प्रथम तद्व्युत्पत्तिपरकार्थज्ञानमावश्यक भवति। निरुक्तस्य प्रतिपाद्यविषयाः— वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातूनामनेकार्थेषु सम्प्रयोगः सन्ति।

## वैदिकसाहित्यपरिचयम् : एकस्यां दृष्टौ

| वेद (संहिता) | शाखाः | ब्राह्मणम् | आरण्यकम् | उपनिषद् | विशेष (ऋत्विक, सूक्त आदयः) |
|---|---|---|---|---|---|
| ऋग्वेदः | 21 शाखा सन्ति परं वर्तमाने निम्न शाखा एवं उपलब्धाः<br>(1) शाकल शाखाः<br>(2) वाष्कल शाखा<br>(3) शाखायन शाखा<br>(4) माण्डूकायनी शाखा | (1) ऐतरेय ब्राह्मणम्<br>(2) शांखायनम् कौषीतकि ब्राह्मणम् वा | (1) ऐतरेयारण्यकम्<br>(2)शांखायनारण्यकम् | (1) ऐतरेयोपनिषद्<br>(2) कौषीतकि उपनिषद्<br>(3) वाष्कलोपनिषद् | ऋत्विक - होता<br>सूक्तानि-1028<br>मन्त्राः-10580$\frac{1}{4}$<br>प्रारम्भिक सूक्तं— अग्नि सूक्तम्<br>अन्तिम सूक्त-- संज्ञान सूक्तम् |
| यजुर्वेदः | द्वे शाखे स्तः<br>**(क) शुक्ल यजुर्वेदः**<br>(1) माध्यन्दिन या वाजसनेयि शाखा<br>(2) काण्व शाखा<br>**(ख) कृष्ण यजुर्वेदः**<br>(1) तैत्तिरीय शाखा<br>(2) मैत्रायणी शाखा<br>(3) कठ शाखा<br>(4) कपिष्टल शाखा | **(क) शुक्ल यजुर्वेदः-**<br>(1) शतपथ ब्राह्मणम्<br>**(ख) कृष्ण यजुर्वेद**<br>(1) तैत्तिरीय ब्राह्मणम् | **(क) शुक्ल यजुर्वेदः-**<br>**(1)** वृहदारण्यकम्<br>**(ख) कृष्ण यजुर्वेदः-**<br>(1) तैत्तिरीयारण्यकम्<br>(2) मैत्रायणी आरण्यकम् | **(क) शुक्ल यजुर्वेदः-**<br>(1) ईशोपनिषद्<br>(2) वृहदारण्यकोपनिषद्<br>**(ख) कृष्ण यजुर्वेद**<br>(1) कठोपनिषद्<br>(2) तैत्तिरीयोपनिषद्<br>(3) श्वेताश्वतरोपनिषद्<br>(4) मैत्रायणीयोपनिषद् | ऋत्विक-अध्वर्यु<br>मन्त्र-<br>**(क) शुक्ल यजुर्वेद-**<br>माध्यन्दिन संहिता 40 अध्यायाः, 303 अनुवाक्. 1975 मन्त्राः<br>**(ख) कृष्ण यजुर्वेद-**<br>तैत्तिरीय-7 काण्ड, 44 प्रपाठक**,** 631 अनुवाक 2198 मन्त्रः मैत्रायणी-4 काण्ड, 54 प्रपाठक, 634 अनुवाक्, 2144 मन्त्र, कठ-40 स्थानक, 843 अनुवाक, 3091 मन्त्र<br>**(ग) कपिष्ठल**-6 अष्टक, 48 अध्याय |
| **सामवेदः** | सहस्त्र शाखाः सन्ति किन्तु तिस्त्र :शाखा एव उपलभ्यन्ते<br>(1) कौथुमीय शाखा<br>(2) राणायनीय शाखा<br>(3) जैमिनीय शाखा | (1) पंचविश ब्राह्मणम्<br>(2) षडविंश ब्राह्मणम्<br>(3) छान्दोग्य ब्राह्मणम्<br>(4)सामविधान ब्राह्मणम<br>(5) आर्षेय ब्राह्मणम्<br>(6) **देवताध्याय ब्राह्मणम**<br>(7) संहितोपनिषद् ब्राह्मणम | (1) **तलवकार आरण्यकम्**<br>(2) **छान्दोग्यारण्यकम्** | (1) केनापनिषद्<br>(2) छान्दोग्य उपनिषद् | ऋत्विक उद्गाता, मन्त्राः 1875 येषु 1771 मन्त्राः ऋग्वेदस्य सन्ति। सामवेदस्य द्वौ भागौ स्तः |

| | | | | | |
|---|---|---|---|---|---|
| | | (8) वंश ब्राह्मणम्<br>(9) जैमिनीय ब्राह्मणम | | | (1) पूर्वार्चिकम् 4 काण्डानि, 6 अध्यायाः, 650 मन्त्राः<br>(2) उत्तरार्चिकम्-21 अध्यायाः च 1225 मन्त्राः सन्ति |
| अथर्ववेदः | नव शाखा सन्ति<br>(1) पिप्पलाद शाखा<br>(2) शौनक शाखा<br>(3) मौद शाखा<br>(4) स्तोद शाखा<br>(5) जलद शाखा<br>(6) जाजल शाखा<br>(7) ब्रह्मवेद शाखा<br>(8) देवदर्श शाखा<br>(9) चारण वैद्य शाखा<br>यस्मिन् केवल पिप्पलादः शौनिक च शाखे उपलब्धे | (1) गोपथ ब्राह्मणम् | न कोऽपि आरण्यकम् उपलब्धम् | (1) प्रश्नोपनिषद्<br>(2) माण्डूक्योपनिषद्<br>(3) मुण्डकोपनिषद् | ऋत्विक-ब्रह्मा<br>काण्डानि - 20<br>सूक्तानि - 730<br>मन्त्रा - 5987<br>इतर नाम - अंगिरसवेदः, ब्रह्मवेदः, भैषज्यवेदः, छन्दोवेद महीवेदः। |